कृ० २।१२।११। "जातूष्टिरस्य सर्वदास्थिरश्च" भा०।

जातेष्टि स्त्री जाते पुत्रजनने इष्टिः। पुत्रजन्मोत्तरं श्रुतिविहिते वैश्वानराख्ये इष्टिभेदे।

जातेष्टिन्याय पु० जैमिनिप्रदर्शिते पितृकृतेष्ट्या पुत्रगतफलसूचके एकस्य काम्यत्वनैमित्तिकत्वसूचके न्यायभेदे स च न्यायो जै० प्रथमस्य चतुर्थे पादे यथा।

काम्येष्टिकाण्डे श्रूयते। "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यद्वयकपालस्त्रिष्टतैवास्मिंस्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं, यदेकादशपालस्त्रिष्टुभैवास्मिन्निन्द्रियमादधाति यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति यस्मिन् जाते एतामिष्टिं निर्वपति स एव पूतो बलवान् तेजस्वी अन्नाद इन्द्रियावी पशुमान् भवतीति"। अत्राष्टादिसंख्यासामान्यात् पुरोडाशादीनां गायत्र्यादिरूपताकल्पना कृता द्वादशकपालेषु या संख्या तस्यामष्टत्वादिसंख्यानामन्तर्भावात् संख्यां निमित्तीकृत्याग्निहोत्रादिशब्दवत् अष्टाकपालादिशब्दाः कर्म्मनामधेयानीत्येकः पक्षः।

अयमनुपपन्नः तथा हि द्वादशकपालादिशब्दा न संख्यापराः किन्तु पुरोडाशद्रव्यपराः द्वादशकपालेषु संस्कृत इति व्युत्पत्तेः एवमष्टाकपालादिशब्दाश्चेति नामधेयस्य निमित्तत्वं नास्तीति चेत् पुरोडाशद्रव्यरूपगुणो विधीयतां न च द्वादशकपालं निर्वपेदित्युत्पत्तिविधिशिष्टद्वादशपुरोडाशविरुद्धत्वादष्टाकपालादेरनवकाश इति वाच्यं ब्रह्मवर्चसादिविशेषफलाय तद्विधीनामुपपत्तेरित्यपरः पक्षः।

अयमपि पक्षोऽनुपपन्नः अनेकगुणविधौ वाक्यभेदापत्तेः न च भिन्नान्येव वाक्यानि, द्वादशकपालं निर्वपेदिति विहितयागस्य यस्मिन् जाते एतामित्युपसंहारेण एकवाक्यत्वावगमात् द्वादशकपाल इतीष्टेर्नामधेयमिष्टिरंशो अष्टाकपालादिभिरंशैः स्तूयत इति सिद्धान्तः पक्षः। अत्र च पुत्रजन्मनिश्चयः, पुत्रस्य पूतत्वादिफलकामना चेति संवलिताधिकारः काम्यनैमित्तिकत्वात् अतः केवलपुत्रजन्मरूपनिमित्तनिश्चयवतः केवलपुत्रपूतत्वादिकामनावतो वा नाधिकार इति सुधीभिर्विभावनीयम्" तत्त्वबो०।

अनेन न्यायेन अन्यकृतकर्म्मणा अन्यस्य फलसाधनतापि सूचिता यथा पुत्रकृतश्राद्धेन पितुः स्वर्गादि फलं जन्यते एवं पितृकृतेष्ट्या पुत्रगतपूतत्वादिफलसिद्धिः। अतएव हेमाद्रिणा श्राद्धकल्पे अयमेव न्यायः पुत्रकृतश्राद्धेन पितुरुपकारकत्वे दृष्टान्ततयोक्तः।

जातोक्ष पु० जातः प्राप्तद्यावस्थः उक्षा टच्समा०। युवद्वये इह जातत्वं प्राप्तवलीवर्द्दभावत्वं प्राप्तद्यावस्थत्वमिति यावत्

जात्य त्रि०जातौ भवः यत्। १कुलीने, २श्रेष्ठे, ३कान्ते च मेदि०। ४सुन्दरे जटाधरः "किं वा जात्याः स्वामिनो न्यूनयन्ति" माघः। "जात्यस्तेनाभिजातेन शूरः शौर्य्यवता कृशः" रघुः। "सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु। आनुलोम्येन संभूता जात्या जातास्त एव ते" मनुः।

जात्यन्ध त्रि० जातौ जन्मन्येवान्धः। जन्मान्धे "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजड़मूकाश्च ये च केचिन्निरिन्द्रियाः" मनुः।

जात्यासन न०"अथ जात्यासनं वक्ष्ये येन जातिस्मरो भवेत्। हस्ताङ्घ्रियुग्मं भूमौ च गमनागमनं ततः" रुद्रयामलोक्ते आसनभेदे।

जात्युत्तर न० जात्या व्याप्तिविधुरसाधर्म्यवैधर्म्यादिना उत्तरम्। न्यायोक्ते असदुत्तरे तच्च चतुर्विंशतिविधं जातिशब्दे दर्शितम्।

जान पु०जन—भावे घञ् वेदे दृष्टिः। १उत्पत्तौ "को वेद जान मेषाम्" ५।५।३।१। "जानसुत्पत्तिम्" भा०। जनस्येदमण्। २जनसम्बन्धिनि त्रि०। "मरुते जानराज्यायेन्द्रस्येन्द्रियाय" यजु० ६।४०। स्त्रियां ङीप्।

जानक त्रि०जनकस्य पितुः तद्गामन्तपस्येदं वा अण्।१पितृसम्बन्धिनि २जनकन्तपसम्बन्धिनि च स्त्रियां ङीप्। सा च ३रामपत्न्यां सीतायाम् "सुमोच जानक्यपि जानकीं न यः" माघः।

जानकि पु० जनकस्यापत्यम् इञ्। भारतप्रसिद्धे नृपभेदे। "विनाशनस्तु चन्द्रस्य य आख्यातो महासुरः। जानकिर्नाम विख्यातः सोऽभवन्मनुजाधिपः" भा० आ० ६७अ०। "जानकिश्च सुशर्म्मा च मणिमान् पोतिमत्सकः" भा०उ०२अ०।

जानन्ति पु० ऋग्वेदिभिस्तर्पणीये ऋषिभेदे। "जानन्ति बाहविगार्ग्य गौतमशाकल्यबाभ्रव्यमाण्डव्यमार्कण्डेयाः" इत्युपक्रमे "ते सर्वे तर्पन्तिवि" आश्व०गृ०३।४।४।

जानपद पु० जानेन उत्पत्त्या पद्यते पद्—अण्। १जने लोकमात्रे "कृतप्रज्ञश्च मेधावी बुधो जानपदः शुचिः" भा० शा० ८३अ०। जनपद एव स्वार्थे अण्। २देशे च मेदि०। जनपदादागतः जनपदे भवो वा अण्। जनपदादागते ३करादौ "स यथा महाराजो जान-